योगवासिष्ठः/प्रकरणम् ३ (उत्पत्तिप्रकरणम्)/सर्गः ०८९

एकोननवतितमः सर्गः ८९

भानुरुवाच ।

मनो हि जगतां कर्तृ मनो हि पुरुषः परः ।

मनःकृतं कृतं लोके न शरीरकृतं कृतम् ।। १

सामान्यब्राह्मणा भूत्वा मनोभावनया किल ।

ऐन्दवा ब्रह्मतां याता मनसः पश्य शक्तताम् ।। २

मनसा भाव्यमानो हि देहतां याति देहकः ।

देहभावनयाऽयुक्तो देहधर्मैर्न बाध्यते ।। ३

बाह्यदृष्टिर्हि नियतं सुखदुःखादि विन्दति ।

नान्तर्मुखतया योगी देहे वेत्ति प्रियाप्रिये ।। ४

मनःकारणकं तस्माज्जगद्विविधविभ्रमम् ।

इन्द्रस्याहल्यया सार्धं वृत्तान्तोऽत्र निदर्शनम् ।। ५

श्रीब्रह्मोवाच ।

काहल्या भगवन्भानो को वात्रेन्द्रस्तमोनुद ।

ययोरुदन्तश्रवणे पावनी दृष्टिरेति हि ।। ६

भानुरुवाच ।

श्रूयते हि पुरा देव मागधेषु महीपतिः ।

इन्द्रद्युम्न इति ख्यात इन्द्रद्युम्न इवापरः ।। ७

तस्येन्दुबिम्बप्रतिमा भार्या कमललोचना ।

अहल्या नाम तत्रासीच्छशाङ्कस्येव रोहिणी ।। ८

तस्मिन्नेव पुरे षिङ्गः षिङ्गप्रकरशेखरः ।

इन्द्रनामा परः कश्चिद्धीमान्विप्रकुमारकः ।। ९

अहल्या पूर्वमिन्द्रस्य बभूवेष्टेत्यहल्यया ।

श्रुतं राजमहिष्याथ कथाप्रस्तावतः क्वचित् ।। 3.89.१०

आकर्ण्यैवमहल्या सा बभूवेन्द्रानुरागिणी ।

अहल्यां मां स नो कस्मात्सक्तोऽभ्येतीत्यथोत्सुका ११

मृणालभारकदलीपल्लवास्तरणेषु सा ।

अतप्यत भृशं बाला लता लूना वनेष्विव ।। १२

खेदमाप समग्रासु तासु भूपविभूतिषु ।

मत्सी निदाघतप्तासु परिलोला स्थलीष्विव ।। १३

अयमिन्द्रोऽयमिन्द्रश्चेत्येवं जातप्रलापया ।

लज्जापि हि तया त्यक्ता वैवश्यमनुयातया ।। १४

इत्यार्तया घनस्नेहमथ तस्या वयस्यया ।

उक्तं तया प्रियेऽविघ्नमिन्द्रमभ्यानयाम्यहम् ।। १५

इष्टं तवानयामीति श्रुत्वा विकसितेक्षणा ।

पपात पादयोः सख्या नलिन्या नलिनी यथा ।। १६

ततः प्रयाते दिवसे समायाते निशागमे ।

सा वयस्या तमिन्द्राख्यं ययौ द्विजकुमारकम् ।। १७

बोधयित्वा यथायुक्तं सा तमिन्द्रमथाङ्गना ।

अहल्यानिकटं रात्र्यामानयामास सत्वरम् ।। १८

ततः सा तेन षिङ्गेन सहेन्द्रेण रतिं ययौ ।

कस्मिंश्चित्सदने गुप्ते बहुमाल्यविलेपना ।। १९

हाराङ्गदमनोज्ञेन तरुणी तेन सा तदा ।

रतेनावर्जिता वल्ली रसेन मधुना यथा ।। 3.89.२०

ततस्तदनुरक्ता सा पश्यन्ती तन्मयं जगत् ।

न समस्तगुणाकीर्णं भर्तारं बह्वमन्यत ।। २१

केनचित्त्वथ कालेन तस्या इन्द्रानुरागिता ।

सा ज्ञाता राजसिंहेन तन्मुखव्योमचन्द्रिका ।। २२

इन्द्रं ध्यायति सा यावत्तावत्तस्या विराजते ।

मुखं पूर्णेन चन्द्रेण प्रबुद्धमिव कैरवम् ।। २३

इन्द्रोऽपि च तदासक्तसमस्तकरणाकुलः ।

न तिष्ठति क्षणमहो तया विरहितः क्वचित् ।। २४

अथातिसुघनस्नेहनिरावरणचेष्टयोः ।

तयोरनयवृत्तान्तो राज्ञाकर्णि कटुव्यथः ।। २५

एवमन्योन्यमासक्तं भावमालक्ष्य भूपतिः ।

चकार बहुभिर्दण्डैः स द्वयोरथ शासनम् ।। २६

तावुभावपि संत्यक्तौ हेमन्ते सलिलाशये ।

तुष्टौ जहसतुस्तत्र न खेदं समुपागतौ ।। २७

अपृच्छत ततो राजा खिन्नौ स्थो न तु दुर्मती ।

तावूचतुर्महीपाल जलाशयसमुद्धृतौ ।। २८

संस्मृत्यावामिहान्योन्यमुखकान्तिमनिन्दिताम् ।

आत्मानं न विजानीवो रूढभावं परस्परम् ।। २९

शासनेषु च यत्सङ्गो निःशङ्कस्तेन हर्षितौ ।

मुह्यावो न महीपाल स्वाङ्गैरपि विकर्तितैः ।। 3.89.३०

ततो भ्राष्ट्रे परिक्षिप्तावखिन्नावेवमेव तौ ।

ऊचतुर्मुदितात्मानावन्योन्यस्मृतिहर्षितौ ।। ३१

ग्रथितौ गजपादेषु न खिन्नावेव संस्थितौ ।

एवमेवोचतुर्भूपमन्योन्यस्मृतिहर्षितौ ।। ३२

कशाहतावखिन्नौ तावेवमेव किलोचतुः ।

अन्यस्माच्छासनाद्राज्ञा कल्पिताच्च पुनः पुनः ।। ३३

उद्धृतावूचतुः पृष्टौ तमेवार्थं पुनः पुनः ।

उवाचेन्द्रो महीपालं जगन्मे दयितामयम् ।। ३४

न शातनानि दुःखानि बाधन्ते किंचिदेव मे ।

अस्याश्चैव जगद्राजन्सर्वं मन्मयमेव च ।। ३५

तेनान्यशासनाद्दुःखं किंचिदेव न विद्यते ।

मनोमात्रमहं राजन् मनो हि पुरुषः स्मृतः ।। ३६

प्रपञ्चमात्रमेवायं देहो दृश्यत एव हि ।

समकालप्रयुक्तेन सहसा दण्डराशिना ।। ३७

वीरं मनो भेदयितुं मनागपि न शक्यते ।

का नाम ता महाराज कीदृश्यः कस्य शक्तयः ।। ३८

याभिर्मनांक्त भिद्यन्ते दृष्टनिश्चयवन्त्यपि ।

वृद्धिमायातु वा देहो यातु वा विशरारुताम् ।। ३९

भावितार्थाभिपतितं मनस्तिष्ठति पूर्ववत् ।

इष्टेऽर्थे चिरमाविष्टं दधानं तत्स्थितं मनः ।। 3.89.४०

भावाभावाः शरीरस्था नृप शक्ता न बाधितुम् ।

भावितं तीव्रवेगेन मनसा यन्महीपते ।। ४१

तदेव पश्यत्यचलं न शरीरविचेष्टितम् ।

न काश्चन क्रिया राजन्वरशापादिका अपि ।। ४२

तीव्रवेगेन संपन्नं शक्ताश्चालयितुं मनः ।

तीव्रवेगेन संयुक्तं पुरुषा ह्यभिवाञ्छितात् ।। ४३

मनश्चालयितुं शक्ता न महाद्रिं मृगा इव ।

ममेयमसितापाङ्गी मनःकोशे प्रतिष्ठिता ।। ४४

देवागारे महोत्सेधे देवी भगवती यथा ।

न दुःखमनुगच्छामि प्रियया जीवरक्षया ।। ४५

गिरिर्ग्रीष्मदशादाहं लग्नयेवाब्दमालया ।

यत्र यत्र यथा राजंस्तिष्ठाम्यभिपतामि वा ।। ४६

तत्रेष्टसंगमादन्यत्किंचिन्नानुभवाम्यहम् ।

अहल्यादयितानाम्ना मनसेन्द्राभिधं मनः ।। ४७

संसक्तमिदमायाति न स्वभावादृते परम् ।

एककार्यनिविष्टं हि मनो धीरस्य भूपते ।। ४८

न चाल्यते मेरुरिव वरशापबलैरपि ।

देहो हि वरशापाभ्यामन्यत्वमिव गच्छति ।

ननु धीरं मनो राजन्विजिगीषुतया स्थितम् ।। ४९

एतानि चात्र मनसां न च कारणानि

राजञ्शरीरशकलानि वृथोत्थितानि ।

चेतो हि कारणममीषु शरीरकेषु

वारीव सर्ववनखण्डलतारसेषु ।। 3.89.५०

आद्यं शरीरमिह विद्धि मनो महात्म-

न्संकल्पितो जगति तेन शरीरसङ्घः ।

आद्यं शरीरमधितिष्ठति यत्र यत्र

तत्तद्धृशं फलति नेतरदस्य पुंसः ।। ५१

मुख्याङ्कुरं सुभग विद्धि मनो हि पुंसो

देहास्ततः प्रविसृतास्तरुपल्लवाभाः ।

नष्टेऽङ्कुरे पुनरुदेति न पल्लवश्री-

र्नैवाङ्कुरः क्षयमुपैति दलक्षयेषु ।। ५२

देहे क्षते विविधदेहगणं करोति

स्वप्नावनाविव नवं नवमाशु चेतः ।

चित्ते क्षते तु न करोति हि किंचिदेव

देहस्ततः समनुपालय चित्तरत्नम् ।। ५३

दिशि दिशि हरिणाक्षीमेव पश्यामि राजन्

प्रिययुवतिमनस्त्वान्नित्यमानन्दितोऽस्मि ।

तव पुरप्रकृतीनां यत्फलं दुःखदायि

क्षणमथसुचिरं तत्तन्न पश्यामि किंचित्।। ५४

इत्यार्षे श्रीवासिष्ठमहारामायणे वा० उत्पत्तिप्रकरणे कृत्रिमेन्द्राहल्यानुरागो नामैकोननवतितमः सर्गः ।। ८९ ।।